# नाट्यचातुरी

## (आचार्यरामजीउपाध्यायस्य)

**धर्मेन्द्रकुमारसिंहदेवः**

'नाट्यं भावानुकीर्तनम्' इति भरतवचनं प्रसिद्धम्। तत्र च, शुभाशुभविकल्पकं, नानाभावोपसम्पन्नं, नानावस्थान्तरात्मकं, लोकवृत्तानु–करणं, हितोपदेशजननं, लोकोपदेशजननं, सप्तद्वीपानुकरणं, वृत्तान्तदर्शकं नाट्यम् इत्यभिधीयते इत्यपि आचार्यो भरतः। नाट्यस्य महत्त्वं प्रतिपादयता मुनिना भरतेन यथोक्तम् –

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते।।**

**(ना.शा. 1.119)**

किञ्च 'काव्येषु नाटकं रम्यम्' इति प्रसिद्धिः सदुक्तिः। तत्रापि माघस्य साधूक्तिः चरितार्थतां भजति। तथाहि –

**क्षणं क्षणं यन्नवतामुपैति तदेव रूपं रमणीयतायाः।**

तदेव रम्यं रूपम् आधारिकृत्य उपाध्यायेन रामजीमहोदयेन रूपकद्वयं प्रणिनाय। सीताभ्युदयम्, कैकेयीविजयम् इति नाटकद्वयं संस्कृतनाट्यालोके सर्वथा नावीन्यम् अवगाहते। एतदेव आश्रित्य अस्माकमत्र विचारसरणिः प्रथते। यद्यपि अनेन आचार्यप्रवरेण त्रिंशाधिक्यं ग्रन्थरत्नं प्रणीतम्। तत्र च भारतीयसंस्कृतिसम्बन्धिनः ग्रन्थाः, समीक्षाग्रन्थाः, अनुसन्धानग्रन्थाः, नाटकोपन्यासग्रन्थाः प्रसिद्धाः। परमत्र शोधपत्रे तेषां नाटके नैपुण्यम् ऊररीकृत्य विचारः प्रकटीक्रियते।

''नाटकं ख्यातवृत्तं स्याद्'' इति धिया रामायणस्य महाभारतस्य चात्र कथा संगृहीता। मूलकथाया युगानुरूपं परिवर्तने परिवर्धने स्वतन्त्राः कवयः। अपि च लोकोपदेशाय सर्वजनहिताय सर्वजनसुखाय च कथायां नूतनप्रातिभसंयोजने सिद्धहस्ता विचक्षणा नाट्यकाराः। तत्र कालिदास–भवभूति–राजशेखर–प्रभृतीनाम् इतिहासं प्रमाणम्। अत्रापि उपाध्यायस्य नाट्यचातुरी कामपि अलौकिकीं शोभां पुष्णाति।

'सीताभ्युदयम्' नाम रामायणस्य सीताचरितमुपजीव्य प्रणीतं षष्ठाङ्कतात्मकं नाटकम्। लङ्काविजयानन्तरं रजकमुखाद् उत्थापितां सीताविषयिणीं विसङ्गतिम् अपाकर्तुं स्वकल्पितां कथां योजयति नाट्यकार

उपाध्यायः। रामभद्रेण सीतायाः परित्यागः भारतीयसंस्कृतेः कलङ्कत्वेन निगदन्ति समीक्षकाः। तस्मात् कविरयं तद्दूरीकर्तुं तत्र कथायां परिवर्तनम् आचरति। सीता रामचन्द्रेण नैव परित्यक्ता, सा तु महर्षेः वसिष्ठस्य आज्ञया आदिकवेः वाल्मीकेः आश्रमे वसतिं चक्रे। अभुक्तमूलनक्षत्रे पुत्रजननापराधं शमयितुमेव तत्राश्रमे सीताया निवासः प्रकल्पितः उपाध्यायकविना।

एवमेव देव्याः सीतायाः पातालगमनं नैव समुचितम् इति मनुते उपाध्यायकविः। तेन, तत्र नाटके मात्रा पृथिव्या सह सीतायाः गमनं निरूपयति नाट्यप्रवरः उपाध्यायः। तत्रापि भारतीयसंस्कृतेः रामकथामाध्यमेन प्रचार एव सीतायाः पातालगमनस्य प्रयोजनत्वेन तत्र संस्थापितः कविना इति।

''कैकेयीविजयम्'' उपाध्यायकवेः द्वितीया नाट्यकृतिः पञ्च अङ्काः अत्र नाटके। तत्र च कैकेय्या निर्दुष्टम् उदारचरितं वर्णितं नाटककारेण। पौराणिकाख्यानानाम् उपजीव्यतया कैकेयीचरितस्य कश्चन अज्ञातपक्षो नाट्येन दर्शितः। नाटकस्यामुखे स्वपक्षसाधनाय कथानकस्य च विस्तराय कैकेयीचरितसंवलिता पौराणिकाख्या चर्चिता।

रामस्य वनगमने कैकेयीचरितं लोकेषु दुष्टम् इति तद्निर्मोष्टुं कविः प्रयतते। ब्रह्मणः प्रेरणया एव कैकेयी रामं वनं प्रेषयितुं प्रवृत्ता इति। इह नाटकीय–सङ्घटनानां संयोजने विशिष्यते कविवरः। संस्कृत–साहित्ये कैकेयी प्रथमवीराङ्गना इति प्रतिष्ठापिता नाट्यकारेण उपाध्यायवर्येण। देशरक्षायै तया बहुविधानि कार्याणि सम्पादितानि। इत्थं कैकेय्याश्चरितं लोकेषु पुनः चमत्कारितं कविनेति।

एवम् उपाध्यायस्य रामजीमहोदयस्य लौकिकं दर्शनं विजृम्भते। नाट्यचातुरी च जयतीति।

*राष्ट्रियसंस्कृतसंस्थानम्*
*भोपालपरिसरः, संस्कृतमार्गः*
*बागसेवनिया, भोपालम् – 43*

–––000–––